[1]छमकः-मिका, [2]छमकः-मिका, [3]चिच्छमिषकः-षिका, [4]चञ्छमकः-चंछमकः-मिका ;

छमिता-त्री, छमयिता-त्री, चिच्छमिषिता-त्री, चञ्छमिता-त्री ;

छमन्-न्ती, [5]छमयन्-न्ती, चिच्छमिषन्-न्ती ; —

छमिष्यन्-न्ती-ती, छमयिष्यन्-न्ती-ती, चिच्छमिषिष्यन्-न्ती-ती ; —

— — चञ्छम्यमानः, चञ्छमिष्यमाणः ;

[6]प्रच्छान्-प्रच्छामौ-प्रच्छामः ; — — —

[7]छान्तम्[A]-छान्तः-छान्तवान्, छमितः, चिच्छमिषितः, चञ्छमितः-तवान् ;

छमः, छमः, चिच्छमिषुः, चञ्छमः ; —

छमितव्यम्, छमयितव्यम्, चिच्छमिषितव्यम्, चञ्छमितव्यम् ;

छमनीयम्, छमनीयम्, चिच्छमिषणीयम्, चञ्छमनीयम् ;

[8]छम्यम्, छम्यम्, चिच्छमिष्यम्, चञ्छम्यम् ;

ईषच्छमः-दुश्छमः-सुच्छमः ; — — —

छम्यमानः, छम्यमानः, चिच्छमिष्यमाणः, चञ्छम्यमानः ;

1. 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (7-3-34) इति, उपधावृद्धेर्निषेधः। एवम् घञि णमुल्यपि ज्ञेयम्।

2. णौ परतः, 'अत उपधायाः' (7-2-116) इति वृद्धौ सत्याम्, अमन्तत्वेन धातोः, 'जनीजॄष्क्नसुरञ्जोऽमन्ताश्च' (ग. सू. भ्वादौ) इति मित्त्वेन, 'मितां ह्रस्वः' (6-4-92) इति ह्रस्वः। एवं ण्यन्ते सर्वत्र प्रक्रिया बोध्या।

3. सनि, द्वित्वे, अभ्यासावयवस्य ह्रस्वस्य, 'छे च' (6-1-73) इति तुगागमः। एवं, सन्नन्ते सर्वत्र प्रक्रिया बोध्या।

4. यङि, द्वित्वे, अभ्यासस्य, 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति नुगागमः। एवं यङन्ते सर्वत्र प्रक्रिया ज्ञेया। परसवर्णविकल्पनाद् रूपद्वयम्।

5. 'निगरणचलनार्थेभ्यश्च' (1-3-87) इति ण्यन्ताच्छतैव, न तु शानच्।

6. क्विपि, 'अनुनासिकस्य क्विझलोः क्ङिति' (6-4-15) इत्युपधादीर्घे, 'मो नो धातोः' (8-2-64) इति पदान्ते नत्वम्।

7. उदित्त्वेन, क्त्वायामिड्विकल्पनात्, 'यस्य विभाषा' (7-2-15) इति निष्ठायामिण्णिषेधः। 'अनुनासिकस्य—' (6-4-15) इति दीर्घः। 'नश्चापदान्तस्य झलि' (8-3-24) इति अनुस्वारे, 'अनुस्वारस्य ययि परसवर्णः' (8-4-58) इति परसवर्णः।

8. 'पोरदुपधात्' (3-1-98) इति यत्।

A. 'चान्तामिषश्छान्तजलः फलावलीं जान्त्वा झमज्झेनमकमीद्गुहाम्॥'

धा. का. 1-60.